ति होतानुमंत्रयते ।। होतर्यजानति यजमानः ।। ॐ एषाते
अग्ने समित्तया वर्द्धस्वचाचप्यायस्व ।। वर्द्धिषीमहिचव
यमाचप्यासिषीमहि ।।१।। संमार्ष्टि पूर्ववदपरिक्रामं॰
सकृत्सकृत्सस्टवां॰ समिति ।। ॐ अग्नेव्वा यजि ह्वाजन्त्वा
सस्टवां॰ संबाजजितं॰ संमार्ज्मि ।।१।। सकृनूष्णीमुपरी
।। ब्रह्मानुज्ञातोऽनुयाजै स्त्रि भिश्चरत्यौपभृतं॰ समानीय ।।
अतिक्रम्याश्राव्याह देवान्यजेति ।। एकस्म द्धवः सन्नातीचो ।।३५।।

जुहोति ।। नप्रत्यनुयाजं प्रत्याग अपसरति ।। अथानुयाजाः ।। ओ३ श्रा
३ वय ।। अस्तु श्रौ ३ षट् ।। देवान्यज ।। देवंबर्हिर्वसुवने व्वसुधेयस्य व्वेतु
३ व्वौ ३ षट् ।। इदं देवाय बर्हिषेनमम ।।१।। ओ३ श्रा ३ वय ।। अस्तु श्रौ ३
षट् ।। यज ।। देवोनराशं॰ सोवसुवने व्वसुधेयस्य व्वेतु ३ व्वौ ३ षट् ।।
इदं देवाय नराशं॰ सायनमम ।।२।। ओ ३ श्रा ३ वय ।। अस्तु श्रौ ३
षट् ।। यज ।। देवो अग्निः स्विष्टकृत्सु द्रविणा मन्द्रः कविः सत्यमन्
मायजी होता होतुर्होतु रायजीयानग्ने यान्देवानयाड्या२ अपिप्रे
र्ये ते होऽत्रे अमत्सत ।। तां॰ सस्सनुषीं॰ होत्रान्देवंगमां दिविदेवेषु

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥३६॥ यज्ञमेरयेमर्द्र. स्विष्टकृच्चाग्ने होताभूर्वसुवने वसुधेयस्य नमोवाके
वीही ३ वौ ३ षट्॥ इदं देवा याग्नये स्विष्टकृते नमम॥३॥ यजतिस्था
नादेत्य॥ जुहोतिस्थाने उपविश्य॥ चतुर्थं. समानीय प्राचींधारानु
याजाहुतिं जुहोति॥ ॐ देवेभ्यः स्वाहा॥ इदं देवेभ्यो नमम॥ अभिचा
रिकमनुयाजानुमंत्रणं॥ अभिचारन्ननुयाजामंत्रणमशन्यमुं
जहि शादिन्यमुंजह्युल्कुष्यमुंजहीति॥ ॐ अशन्यमुंजहि॥ इति प्रथ
मानुमंत्रणं॥ ॐ शादिमुंजहि॥ इति द्वितीयानुमंत्रणं॥ ॐ उल्कु
ष्यमुंजहि॥ इति तृतीयानुमंत्रणं॥ एवं प्रवृत्तौ समं विभजेत॥ स्व ॥३६॥

स्थानात्येन वोपायितात्॥ इत्याभिचारिक मनुयाजानुमंत्रणं॥
अथ स्रुग्व्यूहनं॥ एत्य जुहूपभृतो व्यूहत्यग्नीषोमयोरिति जुहूं
प्राचीन्दक्षिणेनोत्तानेन अध्वर्युर्वानूज्जयत्वयं यजमानो व्या
जस्येनमिति पूर्वे॥ ॐ अग्नेरग्नीषोमयोरुज्जितिमनूज्जयत्वयं रग्नीषोमयो
यजमानो व्याजस्यैनं प्रसवेन प्रोहामि॥१॥ ॐ अग्नीषोमौ तमि
तीतरेणेतरां नीचां प्रतीचीं यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टीत्यु
त्तरे॥ ॐ अग्निरग्नीषोमौ तमपनुदंतु यमयं यजमानो द्वेष्टि यश्चै षोमावेनं
नं द्वेष्टि व्याजस्यैनं प्रसवेनापोहामि॥ इत्यध्वर्युकर्तृकं व्यूहनं॥ अथ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

सोमावंतराज्येनोपांशु ॥ अग्नीषोमावेकादशकपालेन पुरोडाशेन ॥ स
||२|| योहं यक्ष्ये ॥ ओवा ॥ श्रीरग्निर्यागः ॥ यजैर्वा ॥ उत्तमे काले व्रतोपा
यनं ॥ तत्राग्ने व्रतपते इदमहमिति वा ॥ येके च न नैकल्पिकपदार्था
स्ते ऋत्विक्प्रत्ययेन मया वधारिताः ॥ षट् समिधो गृहीत्वा ॥ ॐ म
माग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तन्वं पुषेम ॥ मह्यन्नमंतां प्र
दिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ आहवनीये समिधमा
दधाति ॥ तूष्णीं द्वितीयां ॥ एवमितरयोरग्न्योः ॥ महाव्याहृतिभि ||२||
र्वा प्राक् संस्थं ॥ तूष्णीं वा यथापूर्वं ॥ अतनिभाहं समैथुने वर्ज

येत् ॥ केशश्मश्रु वपनं वा शिखं ॥ अपराह्णे व्रतोपायनीयमश्नीत
सर्पिषा सुहितौ ॥ अन्यथा व्रतोपायनं ॥ सत्यवचनः ॥ कर्मांगमु
त्तरे सत्यवदनं ॥ वृक्षारण्योषधीनामश्नीयात् आहवनीयगृहे ३ ॥ अ
धो गार्हपत्यस्य वा ॥ स घोवा ॥ प्रातरग्निहोत्रं हुत्वा ॥ ब्रह्माणं वृणीते
ऋत्विक्षं ॥ षडासनानि ॥ ब्रह्मयजमानयोः ॥ वर्णार्थमुपवेशनार्थं च ॥
प्रणीतापत्न्योश्च ॥ उदङ्मुखो यजमानः ॥ प्राङ्मुखं ब्रह्माणं ॥ दक्षि
णं जान्वालभ्य ॥ ॐ तत्सत्परमेश्वरप्रीत्यर्थे पौर्णमासेष्ट्याहं यक्ष्ये ॥
तत्र ॐ भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहे ॥ वृ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

।३७।। या यजमान कर्तृकं ।। इति वैकल्पिक कर्तृकं व्यूहनं ।। यजमानः स्वास
नादुत्थाऽध्वर्योः स्थाने उपविश्य व्यूहति ।। ॐ अग्ने रग्नीषोमयोरु
ज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ।।१।। ॐ अग्नि रग्नीषोमौ त
मपनुदतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ।।२
।। यथादैवतमन्यत् ।। अभ्युक्षन् जुह्वा परिधीननक्ति यथापूर्वं वसुभ्यः
इति प्रतिमंत्रं ।। अभ्युक्षणं कार्यामि संबधात् जौ हवैं कार्यं ।। ॐ वसु
भ्यस्त्वाऽअनज्मि ।।१।। ॐ रुद्रेभ्यस्त्वाऽअनज्मि ।।२।। अरौ द्रलान्त्वादूक
स्पर्शः ।। ॐ आदित्येभ्यस्त्वाऽअनज्मि ।।३।। प्रथमं परिधिं गृहीत्वाऽश्वा ।।३७।।

।३९।। रणमाशास्ते सजातवनस्यामाशास्ते दिव्यं धामाशास्ते यदनेन हवि
षाऽऽस्ते तदस्यात् तदृध्यात्तदस्मै देवा रासन्तां तदग्निर्देवो देवेभ्यो वनुतां
वयमग्नेः परिमानुषाः ।। इष्टं च वित्तं चोभे चैनं द्यावापृथिवीऽअंह
सस्पातामिह गतिर्वामस्येदं च नमो देवेभ्यः ।। इति होतुः सूक्तवाकान्ते
ऽध्वर्युराहवनीये हस्तेन प्रस्तरं प्रागग्रमुदगग्रं वा प्रहरति ।। अदग्ध
प्रस्तरं हस्तेनैवाचरति भग्नाग्रमुपस्थमूहती त्यर्थः ।। नकाष्ठादिना ।। अग्नी
दाहानुप्रहरेति ।। ॐ अनुप्रहर ।। प्रास्य तृणं ।। चक्षुष्पा इत्यात्मान मा
लभते ।। ॐ चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ।।उद०।। संवादशंयोर्वाकः ।।३९।।

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

॥३१॥ रणमाशास्ते सजातवनस्यामाशास्ते दिव्यंधामाशास्ते यदनेन हवि
षाऽऽस्ते तदस्यात दृध्यात्तदस्मै देवारासंतांत दग्निर्देवो देवेभ्योवनुतां
वयमग्नेः परिमानुषाः॥ इष्टंच वित्तंचोभे चैनंद्यावापृथिवीऽ अंहस
स्पातामिह गतिर्वामस्येदंच नमो देवेभ्यः॥ इति होतुः सूक्तवाकांते
ऽध्वर्युराहवनीये हस्तेन प्रस्तरं प्रागग्रमुदगग्रंवा प्रहरति॥ अदग्धे
प्रस्तरं हस्तेनैवाचरति अग्नौ प्रस्तमूहतीत्यर्थः॥ नकाष्ठादिना॥ अग्नी
दाहानुप्रहरेति॥ ॐ अनुप्रहर॥ प्रास्य तृणं॥ चक्षुष्पा इत्यात्मानमा
लभते॥ ॐ चक्षुष्पाऽ अग्नेसि चक्षुर्मे पाहि॥ उद०॥ संवादशंयोर्वाकः ॥३१॥

व्याह॥ ओ३ श्रा३वय॥ अस्तु श्रौ३षट्॥ ॐ इषितो दैव्या होतारो भद्रवाच्या
य प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रू३हि॥ संजानाथामिति प्रस्तरा
दानं॥ ॐ संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावतां॥ विधृती
स्थाने कृत्वा॥ विधृत्योः स्थानमाहवनीयः॥ सर्वहविषां न दधिकरणत्वा
दिति कर्कः॥ अनक्ते न व्यंतु व्यय इति॥ प्रत्यंजनमंत्रः॥ [illegible] अग्रं जुह्वां॥
ॐ व्यंतु वयोक्तꣳ रिहाणाः॥ मध्यमुपभृति॥ ॐ व्यंतु वयोक्तꣳ रिहा
णाः॥ ॐ मूलं ध्रुवायां॥ ॐ व्यंतु वयोक्तꣳ रिहाणाः॥ मरुतामिति प्रस्तर
रं नीचैर्हृत्वा॥ ॐ मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततोनो

Takshashila Project

॥३८॥ वृष्टिमाचार्य॥ तृणमादाय॥ सूक्तवाकान्ते प्रहरति॥ होता सूक्तवाकं प
ठति॥ ॐ इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमुत नमोवाकमृध्या
स्म सूक्तोच्यमग्नेत्वऽ सूक्तवागसि॥ उपश्रुती दिवस्पृथिव्योः रोमन्व
तीतेऽस्मिन्यज्ञे यजमानद्यावापृथिवी स्तामऽ शंगवी जीवदानूऽ अत्रस्नूऽ
अप्रवेदेऽ उरुगव्यूतीऽ अभयंकृतौ॥ वृष्टिद्यावारीत्यापाशंभुवौ मयो
भुवाऽ ऊर्जस्वती च पयस्वती च सूपचरणा च स्वधिचरणा च तयोरा
विदि॥ अग्निरिदऽ हविरजुषतावीवृधत महोज्यायोऽकृत॥ सोम इ
दऽ हविरजुषतावीवृधत महोज्यायोऽकृत॥ इत्याज्यभागदेवतासंकीर्तनं ॥३८॥

॥ अग्निरिदऽ हविरजुषतावीवृधत महोज्यायोऽकृत॥ उपांशु॥ अग्नीषो
मौ॥ उच्चैः॥ इदऽ हविः॥ उपांशु॥ अजुषेतामवीवृधेतां॥ उच्चैः॥ महो
ज्यायः॥ उपांशु॥ आक्रातां॥ उच्चैः॥ अग्नीषोमाविदऽ हविरजुषेतामवीवृधे म
तां महोज्यायोऽक्रातां॥ इति प्रधान देवता संकीर्तनं॥ अग्निः स्विष्टकृदि
दऽ हविरजुषतावीवृधत महोज्यायोऽकृत॥ इति स्विष्टकृद्देवतासं
कीर्तनं॥ आस्यामृध्येद्धोत्रायां देवंगमायामाशास्तेऽ यं यजमानः॥ अ
मुकशर्मा श्री यजमानः॥ इति यजमानस्य नामग्रहणं॥ यदि नाम न विं
देत् यज्ञकाम इत्येव ब्रूयात्॥ उत्तरां देवयज्यामाशास्ते भूयो हविष्क

॥ देवा आज्यपा आज्यमजुषंतावीवृधंत महोज्यायोऽक्रत॥ ५ बोध.

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

।३१॥ रणमाशास्ते सजातवनस्यामाशास्ते दिव्यंधामाशास्ते यदनेन हवि
षाशास्ते तदस्यात दृध्यात्तदस्मै देवारासंतांत दग्निर्देवो देवेभ्योवनुतां
वयमग्नेः परिमानुषाः॥ इष्टं च वित्तं चोभे चैनंद्यावापृथिवीऽअंहसः
सस्पातामिह गतिर्व्वामस्येदं च नमो देवेभ्यः॥ इति होतुः सूक्तवाकांते
ऽध्वर्युराहवनीये हस्तेन प्रस्तरं प्रागग्रमुदगग्रं वा प्रहराति॥ अदग्ध
प्रस्तरं हस्तेनैवाचरति अग्नावुपस्तामूहतीत्यर्थः॥ नकाष्ठादिना॥ अग्नी
दाहानुप्रहरेति॥ ॐ अनुप्रहर॥ प्रास्य तृणं॥ चक्षुष्पाइत्यात्मान मा
लभते॥ ॐ चक्षुष्पाऽअग्ने सिच क्षुर्मे पाहि॥ उद०॥ संवाद शंयोर्वाकः ॥३१॥

श्रा
संवदस्वाद् नग्नीद गच्छश्रावय श्रौषट्॥ स्वगा दैव्या होतृभ्यः स्वस्तिर्मा
नुषेभ्यः शंयोर्ब्रूहि॥ इत्येषाद्धे० संवदस्वागच्छ श्रौषाडिन्त्यग्नीत् छेषमि
तरो ध्वर्युर्व्यत्यासंब्रूतः॥ संवदस्व॥ अगानग्नीत्॥ अगन्॥
श्रावय॥ श्रौषट्॥ स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शं
योर्ब्रूहि॥ होता शंयोर्वाकं पठति॥ ॐ तच्छंयोरावृणीमहे गातुंय
ज्ञाय गातुं यज्ञपतये दैवीस्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं
जिगातु भेषजद्धे० शन्नोऽअस्तु द्विपदे शं चतुष्पदे॥ इति शंयोर्वाकः
॥ अनयेति प्रादेशं वेदिश्रोणौ निदधाति होता॥ ॐ अनया॥ अध्व

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥४०॥ र्यु परिधीननुप्रहरति ध्रुवं परिधिमिति ॥ ॐ यं परिधिं पर्यधत्थाः अग्ने देव पणिभिर्गुह्यमानः ॥ तन्त एतमनु जोषं भराम्येष नेत्त्वदपचेतयातै
॥ इत्तरौ च युगपदग्नेः प्रियमिति ॥ ॐ अग्नेः प्रियं पाथोपीतम् ॥१॥
इति परिधि होमः ॥ अथ वैश्वदेवः संस्रवहोमः ॥ जुहूमुपभृतं च संगने कृत्वा उभे युगपदुद्गृह्णाति तूष्णीं ॥ द्वयोः ग्रहण विधान सामर्थ्यात् द्वाभ्यामपि ॥ स्रुचो प्रगृह्णाति स ध्रुवं स्रव भागा इति संस्रवां जुहोति ॥ ॐ सध्रुवं स्रव भागास्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेया श्च देवाः ॥ इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वं
मा ॥४०॥

स्वाहा व्वाट् ॥ इदं विश्वेभ्यो देवेभ्यो नमम ॥ घृताचीति धुरि निदधात्यन सिंचेत् ग्रहणध्रुवं स्मये पाप्त्यां चेत् ॥ ॐ घृताचीस्थो धुर्यौ पातं सुम्ने स्थः सुम्ने मा धत्तम् ॥ यज्ञनमश्च तत उपच यज्ञस्य शिवे संतिष्ठस्व स्विष्टि मे संतिष्ठस्व ॥ अथ पत्नी संयाजाः ॥ वेदं होता ॥ स्रुक् स्रुवमध्वर्युः ॥ आज्यस्थाली मग्नीत् ॥ आदाय ॥ पत्नी संयाजेभ्यो गार्हपत्यं गच्छंति ॥ तत्र अध्वर्युः गार्हपत्य दक्षिणाग्नी अंतरेण गत्वा पत्न्या अग्ने यजनित्वात् गार्हपत्यस्य दक्षिणत ईशानाभिमुख उपविशति ॥ गार्हपत्यस्य पश्चाद्धोता ऊर्ध्व जानुः ॥ तदुत्तरतोऽग्नी दक्षिणाभिमुखः

यज्ञनमश्च तः तेषं दिमालके

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥४१॥ त्येन सर्वे उपविशंति ॥ यजेतित्यादि सृष्ठो मेप्राप्ते वचनात् ॥ उपवि
श्य दक्षिणं जान्वाच्येनऽ सर्वत्रोपविष्ट होमेषु ॥ यजति सोमं त्वष्टारं
देवानांपत्नी रग्निं गृहपति मिति ॥ सर्वे ॥ उपांऽशु चरंति ॥ चरणशब्दैन
सर्वमुपांशु ॥ देवतान्यत्रोपांशु ॥ यस्मिन् मंद्रादयो न विज्ञायंते न स्वरो (मंद्रा)
न व्यंजनं केवलमेवोष्ठ चालनं आसोवात दुपांऽशु। इति होत्रकंपरिशिष्टं।
सोमायानुब्रूहि ॥ ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्य
म् ॥ भवा वाजस्य संगथेम् ॥१॥ स्थालीतोजुव्हां चतुर्गृहीतग्रहणं। ॥४२॥
॥ओ३ श्रावय ॥ अस्तु श्रौ३षट् ॥ सोमं यज ॥ ये३ यजामहे सोमं।

सन्ते पयांऽसि समुयंतु वाजाः सं वृष्ण्यान्यभिमातिषाहः ॥ आप्याय
मानो अमृताय सोम दिवि श्रवांऽस्युत्तमानि धिष्वा३ वौ३षट् ॥ इदं सो
मायनमम ॥ त्वष्ट्रेनु ब्रूहि ॥ इह त्वष्टारमग्रियं विश्वरूप मुपह्वये ॥ अ
स्मा स्माकमस्तु केवलो३म् ॥ ओ३ श्रा३वय ॥ अस्तु श्रौ३षट् ॥ त्वष्टारं यज
॥ ये३ यजामहे त्वष्टारं तन्नस्तुरीपमध पोषयित्नु देवत्वष्टर्वि रराण — वि
स्यस्व ॥ यतोवीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामा३ वौ३
षट् ॥ इदं त्वष्ट्रे नमम ॥२॥ तृतीयेन धानं पुरस्तात् गार्हपत्यस्यप
त्न्यन्वारभतेऽध्वर्युं ॥ अनुवचनादि होमांतोऽन्वारंभः ॥ पत्न्या

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥४२॥ भावे येन केन चिदन्वारंभः कर्तव्यः॥ द्वितीया निर्देशादध्वर्यु संस्कारोयं
॥ अध्वर्यु ग्रहणाच्च नद्रव्यान्वारंभः॥ देवानां पत्नीभ्योनुब्रू ३ हि॥ दे
वानां पत्नी रुशतिरवंतु नः प्रावंतु नस्तुजये वाजसातये॥ याः पा
र्थिवासो या अपामपि व्रते तानो देवीः सुहवाः शर्म यच्छतो ३ म्॥ च
तुर्गृहीत ग्रहणं॥ ओ ३ श्रा ३ वय॥ अस्तु श्रौ ३ षट्॥ देवानां पत्नीर्यज॥
ये ३ यजामहे देवानां पत्नीरुत ग्ना व्यंतु देवपत्नीरिंद्राण्यग्नाय्यश्विनी
राट्॥ आरोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनां ३ वौ ३ ष
ट्॥ इदं देवानां पत्नीभ्यो नमम॥ ३॥ अंतर्धानमपनीय॥ अग्नये गृहपत ॥४२॥

येनुब्रू ३ हि॥ अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः
॥ देवानामुत यो मर्त्यानां यजिष्ठः स प्रयजतामृतावा ३ म्॥ चतुर्गृहीत ग्र
हणं॥ ओ ३ श्रा ३ वय॥ अस्तु श्रौ ३ षट्॥ अग्निं गृहपतिं यज॥ ये ३ य
जामहे अग्निं गृहपतिः हव्यवाडग्निरजरः पिता नो विभुर्विभावा सुदृ
शीको अस्मे॥ सुगार्हपत्याः समिषो दिदीह्यस्मद्रयक्सं मिमीहि श्र
वांसी ३ वौ ३ षट्॥ इदमग्नये गृहपतये नमम॥ ४॥ सर्वशेषं जुहुयात्॥
पूर्ववदिडां तमेव निपतं॥ शंय्वंतं भवति नवेति विकल्पः॥ स्रुचं भू
मौ निधाय॥ उपांश्वा स्थाल्याः स्रुवेण पंचकृत्व आज्यग्रहणं॥ होत्रे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥४३॥ प्रदानादिमार्जनांतमिडाकरणं पूर्ववत् ॥ तत्र दर्भैर्मार्जनमिति विशेषः
॥ ॐ उपहूत इ० ॥ उपहूतेयं पत्न्युत्तरस्यां देवयज्यायामुपहूताभूयसि
हविष्करण उपहूता देवा म इदं० हविर्जुषंता मिति तस्या नुपहूता ॥ इ
ति होतुर्विशेषः ॥ ततो गार्हपत्यस्योत्तर उपविश्य ॥ जुहूं स्रुवंच संप्रगृह्य ॥
उभाभ्यां पत्नीसंयाज संवस्रवहोमो स्रुक् स्रुवं प्रगृह्यात्यग्ने दब्धायावि
ति ॥ ॐ अग्ने दब्धायोऽशीततमपाहि माद्दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै
पाहि दुरद्मन्या अविषन्नः पितुं कृणु सुषदा योनौ स्वाहा स्वाहा ॥ इद ॥४३॥
मग्नये ऽयुदब्धायवेऽशीततमाय नमम ॥५॥ शंखेतेचेत् ॥ वेद

स्यैकतृणमपच्छिद्य ॥ तस्य अग्रं जुहां मध्यं स्रुवे मूलं स्थाल्यां ॥
ॐ व्यंतु वयोक्तं रिहाणाः ॥ इति मंत्रेणोक्त्वा ॥ अग्नौ दाह ॥ अनुप्र
हर ॥ प्रास्य तृणं ॥ चक्षुष्पा इत्यात्मानमालभते ॥ ॐ चक्षुष्पा ऽअग्ने
सि चक्षुर्मे पाहि ॥ उद ॥ संवाद शंयोर्वाकांतं ॥ पूर्ववत् ॥ नानयेति
प्रादेश निधानं ॥ शंख्यंतपक्षे ऽवसरे ऽदब्धाहुति संप्रदायः ॥ इति
पत्नीसंयाजाः ॥ अतीत्य निष्क्रम्यणं ॥ दक्षिणाग्नेरुत्तर उपविश्य ॥
सव्येनावृत्य दक्षिणाग्नौ सकृत् गृहीतेन जुहोत्यग्नय इति सरस्व
त्या इति च ॥ ॐ अग्नये संवेशपतये स्वाहा ॥ इदमग्नये संवेश

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥६६॥ पत्नयेनमम ॥१॥ पुनः सकृत् गृहीतेन ॥ ॐ सरस्वत्यै यशोभगि
न्यै स्वाहा ॥ इदं सरस्वत्यै यशोभगिन्यै न मम ॥२॥ दक्षिणाग्नावे
व पिष्टलेपं जुहोति ॥ ॐ उलूखले मुसले यच्च शूर्पे आशिश्लेष
दृषदि यत्कपाले ॥ उत्प्रुषो विप्रुषः संजुहोमि सत्याः संतु यजमान
स्य कामाः स्वाहा ॥ इदमग्नये न मम ॥ पत्नी वेदं प्रमुंचति वेदोसीति
॥ ॐ वेदोसि येन त्वं देव वेद देवेभ्यो वेदो भवस्तेन मह्यं वेदो भूयाः ॥ पत्ने
व प्रमुञ्चति योक्त्रं च प्रमा मुंचामीति ॥ ॐ प्र मा मुंचामि वरुणस्य
पाशा येन मा बध्ना त्सविता सुशेवः ॥ ऋतस्य योनौ सुकृतस्य ॥६६॥

लोके रिष्टां मा सह पत्या दधातु ॥ होता सर्वेषु समिधमादाय ॥
अग्निष्ठुत्यनिक्रमेण ॥ आहवनीये वा ॥ विस्रस्त वेदं ॥ स्तृणात्या
वेदेः ॥ समारभ्यानादध्वर्युं ॥ तदेऽ होता वेदेः स्तृणान्नेतीति कण्व
शतपथ इति श्रुते हौता ॥ पत्न्य संन्निधाने होतुर्वेदविमोकः ॥ पथे
तन्निष्क्रामेद्धोता ॥ आहवनीये समिधमादधाति ॥ धौर्व्यं समिष्ट
यजुर्जुहोतीदेवागा तु विदहनि ॥ उपविश्य जुहुयैव होम इति कर्कः
॥ तिष्ठन् ध्वयेव होम इति विद्यानाय मिश्राः ॥ ॐ देवा गातु विदो गा
तुं वित्वा गातुमित ॥ मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥६५॥ ॥इदं वातायनमम॥ स्वाहाकुर्यान्न मंत्रांतेन चैव जुहुयाद्धविः॥
स्वाहाकारेण हुत्वाग्नौ पश्चान्मंत्रं समापयेदिति कर्कप्रदीपकात्
त्यायनः॥ जुहोति संबर्हिरिति॥ जुह्वैव सर्वं बर्हिर्होमः इति कर्क
दीपिका॥ ॐ संबर्हिरंक्ताᳪं हविषा घृतेन समादित्यैर्वसुभिः
संमरुद्भिः॥ समिंद्रो विश्वे देवेभिरंक्तां दिव्यं नभो गच्छतु यत्स्वा
हा॥ इदं दिव्यायनभसेनमम॥ संबर्हिर्बर्हिर्देवत्या इति उवटम
हीधर भाष्यकारौ कर्कदीपिका च॥ इदं बर्हिषेनमम॥ वेद्यां प्रणी ॥६५॥
तानिधाय॥ आहवनीय पूर्वेण परीत्य वेद्यां दक्षिणतः उदङ्

मुख उपविश्य॥ वेद्यां प्रणीतानिनयति परीत्य कस्त्वेति॥ ॐ कस्त्वा
विमुंचति सत्वा विमुंचति कस्मै त्वा विमुंचति तस्मै त्वा विमुंचति॥ पो
षायनिनयामि॥ एषवै पौर्णमासेष्टेरवभृथः॥ प्रथमेन मध्यमेन
पुरोडाश कपालेन कणान्तपास्य स्फ्युत्करे अधः कृष्णाजिनंᳪं रक्ष
सामिति॥ ॐ रक्षसां भागोसि॥ नात्रोदक स्पर्शः॥ ततः पूर्णपा
त्रमादाय॥ आहवनीय पूर्वेण परीत्य वेद्यां दक्षिणतः उदङ्मुख उप
विश्य संततं पूर्णपात्रं निनयति॥ निनीयमानं पूर्णपात्रोदकं
संततं यजमानोंजलिना प्रतिगृह्णाति संवर्चसेति॥ ॐ संवर्चसा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥४॥ च्च।उपांशु॥ॐ प्रणयय्यदं देवताद्ध्यीयत्वंनाकस्य पृष्ठे यष्यमानोस्तु॥
सप्तऋषीणाहि॰सुकृतांयत्रलोकस्तत्रेमंयज्ञं यजमानं च धेहि।उच्चैः॥
ॐ प्रणय॥ अनुज्ञात उत्तरेणाहवनीयहि॰ संप्रति निदधाति कस्त्वेति॥
ॐ कस्त्वा युनक्ति सत्वा युनक्ति कस्मैत्वा युनक्ति तस्मै त्वा युनक्ति॥नांत
रेणगच्छेयुः॥तृणैरग्नीन्परिस्तीर्य॥पुरस्तात्प्रथमम्॥ द्विशःपात्रा
णिसहि॰सादयति अपणस्य पश्चादुत्तरतोवा यजमानोवा॥सूर्पाग्नि
होत्रहवणि॥ स्फ्यःकपालं॥ शम्याकृष्णाजिनं॥उलूखलमुसलं॥ ॥४॥
दृषदुपलमर्थवच्च॥पात्रीपवित्रच्छेदनानिच॥पवित्रे उपवेषश्च॥

आज्यस्थाल्युपसर्जनीपात्रंच॥ कुशमुष्टिरन्वाहार्यपात्रंच॥ वेदितृण
मग्निश्च॥ स्रोकर्णं स्रुवश्च॥ जुहूरुपभृच्च॥ ध्रुवासंनहनावच्छा
दनानितृणानिच॥परिधयोविधृत्यौच॥ आज्यंपुरोडाशपा
त्र्यौच॥होतृषदनं॥पत्नीसदनं॥ औषधंप्राशित्रहरणंच॥अ
न्वाहार्यतंडुलांतर्धानकटश्च॥ याजुर्वेदिकहौत्रपक्षेएकासमि
त्॥पूर्णपात्रंच॥कर्मापवर्गपक्षेसमिच्च॥ इध्माबर्हिषोरुपक
ल्पनं॥षडवत्तंच॥ अपणस्य पश्चादनस्तिष्ठत्समंगि॥पात्र्यां
नास्प्योपहितायां तत्रौषधकरणं॥ कर्मणेवामितिशूर्पाग्निहोत्रहव

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥४६॥ पयसा संतनुभिरगन्महि मनसा सं॰ शिवेन॥ त्वष्टा सुदत्रो विदधातु रायो
नुमार्ष्टु तन्वो यद्विलिष्टम्॥ यजमानस्तूष्णीं मुखं विमृष्टे॥ अत
आरभ्य भागप्राशनांतं याजमानं कर्म॥ प्रागुदग्वा दक्षिणपादेन वि
ष्णुक्रमान् क्रमते दिवि विष्णुरिति॥ ॐ दिवि विष्णुर्व्यक्रंस्त
जागतेन छंदसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥
॥१॥ ॐ अंतरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छंदसा ततो निर्भ
क्तो॰ द्विष्मः॥२॥ पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रेण छंदसा त ॥४६॥
तो निर्भक्तो॰ द्विष्मः॥३॥ पृथिव्यामिति ऊर्ध्वो वा॥ अथवा॥ प्रथमं

अस्यै प्रतिष्ठाया इति वेदिभूमिं॥ ॐ अस्यै प्रतिष्ठाया निर्भक्तो योऽस्मान्॰ द्विष्मः॥२ यो

पृथिव्यामिति॥ द्वितीयं अंतरिक्षे विष्णुरिति॥ तृतीयं दिवि विष्णु
रिति॥ ततः स्वस्थाने उपविश्य अस्मादन्नादिति भागमेवेक्षते॥
ॐ अस्मादन्नान्निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥१॥ अगन्म स्वरि
ति प्राङीक्षते प्राचीं॥ ॐ अगन्म स्वः॥ संज्योतिषेत्याहवनीयमीक्ष
ते॥ ॐ संज्योतिषाभूम॥ स्वयंभूरिति सूर्यमेवेक्षते॥ ॐ स्वयंभूरसि
श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि॥ वर्चोदा इति यं कामं
कामयते॥ वर्चोदा असीत्यस्य स्थाने यं काममिच्छेत्॥ तद्वा
चि पदप्रयोगः॥ स यथा॥ गोदा असि गा मे देहि॥ धनदा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

।४७।। असि धनं मे देहि ।। पुत्रदाऽअसि पुत्रं मे देहि ।। इत्यादि ।। सूर्यस्येत्यावर्त
ते प्रदक्षिणं ।। ॐ सूर्यस्यावृतमन्वावर्ते ।। स्मार्तावर्तनपक्षेनेतरथावृ
त्तिः ।। श्रौतावर्तनपक्षेअवत्येव ।। गार्हपत्यमुपतिष्ठतेऽग्नेगृहप
~~तेति~~ तऽइति ।। ॐ अग्ने गृहपते सुगृहपतिस्त्वयाऽग्नेहं गृहपति
ना भूयासꣳ सुगृहपतिस्त्वं मयाऽग्ने गृहपतिना भूयाः ।। अ
स्थूरिणौ गार्हपत्यानि संतु शतꣳहिमाः ।। सूर्यस्येत्यावर्तते प्र
दक्षिणं ।। ॐ सूर्यस्यावृतमन्वावर्ते ।। गच्छति प्राङुरुविष्ण ।।४७।।
विति ततोसि तंतुरसीतिच ।। ॐ उरुविष्णो विक्रमस्वो

रुक्षयायनस्कृधि ।। घृतं घृतयोने पिब प्रप्रयज्ञपतिं तिर ।। ततोसि
तंतुरस्यनु मा तनु ~~अ~~ स्मिन्यज्ञे ~~स्म~~ स्यादꣳ साधुकृत्याया मस्मि
न्नन्नेऽस्मिल्लोके ।। इत्यंतेन मंत्रेण ।। इदं मेकर्मेदं वीर्यं पुत्रोनुसंत
नोति पुत्रस्य नामगृह्णाति ।। गच्छतीति कर्केदीपिका ।। उपवि
श्येति मिश्राः ।। ॐ इदं मे यंवीर्यं अमुकशर्मा पुत्रोनुसंतन
वत् ।। इत्येवं प्रतिपुत्रं मंत्रावृत्तिः ।। अविद्यमाने पुत्रे आत्म
नो नाम गृह्णाति प्रायमांतं ।। ॐ इदं मेऽयंवीर्यं अमुकशर्मा अहं
अनुसंतनानि ।। अथवा ।। नाम्ना स्थाने तंतवे त्वा ज्योतिषेवे

॥४८॥ त्वेतिवा ॥ ॐ इदं मे यं वीर्यं तं व्रतवत्या ज्योतिषे वेत्वा ऽनुसंततनयानि ॥
आहवनीयमुपतिष्ठेत तूष्णीं ॥ मंत्राभावात्कौकिर्वागुच्चारणप्रति
षेध इति कर्कः ॥ व्रतं विसृजते येनोपेयात् ॥ येन मंत्रेण व्रतं गृही
तं तेनैव मंत्रेण व्रतं विसृज्यते ॥ यथा ॥ अग्ने व्रतपते व्रतं
चरिष्यामीत्यनेन व्रतं गृहीतं चेत्तदा ॥ ॐ अग्ने व्रतपते व्रतमचारिषं
[illegible] इति व्रतविसर्गे मंत्रः ॥ यदि इदमहमनृतात्सत्यमुपैमि ॥
इति व्रतग्रहणमंत्रस्तदा ॥ ॐ इदमहं य एवास्मि सोऽस्मि ॥ ॥४८॥
इति व्रतविसर्गे मंत्रः ॥ संचरविमोकः ॥ संस्रवप्रपतिराशिषे

ति भागं प्राश्नाति ॥ ॐ संस्रवप्रपतिराशिषा ऽभ्युज्यताम् ॥ अ
ग्नौ कि स्वभागं आत्मना प्राश्नाति ॥ अध्वर्यु हस्तेनाच्छ रसा हवनी
ये यजमानभागं च प्रोषिते हुत्वा दस्नाति ॥ श्लोकि यवैरयो
श्च नित्यं ॥ नित्यं प्रोषितायोषितयोरित्यर्थः ॥ ॐ अहं त्वद
स्मि मदासि त्वमेतन्ममायं योनिस्तव योनिरसि ॥ ममैव
सन्ह्रियि देवेष्वधि पुत्रः पित्रे लोककृज्जातवेदः स्वाहा ॥ इदं
जातवेदसे न मम ॥ अध्वर्युर्यजमानं प्रति ब्राह्मणं तर्पयितवै ब्रू
या यज्ञमेवैतत्तर्पयति इति श्रुतेः ॥ ॐ ब्राह्मणं तर्पयितवै ॥ अस्त्याः

Takshashila Project

।४९।। पौर्णमासेष्टेः समृध्यर्थं श्रौतमेकं ब्राह्मणं भोजयिष्ये ॥ ब्राह्मणतर्प
णं यजमानस्य ॥ ब्राह्मणभोजनानंतरं ब्रह्मा स्वासनमप्यागम
न संचरेण प्रत्यागत्य कर्मापवर्गे आहवनीयसंनिधमाद्धा
ति जुहोत्युपतिष्ठते वा ॥ ॐ नमः कृताय कर्मणे अकृताय कर्म
णे नमः ॥ अयाज्यग्निं जातवेदा अंतरः पूर्वोऽस्मिन्निषद्य ॥ स
न्वन्० सनि० सुविमुचा विमुंचदेह्यस्मभ्यं द्रविणं जातवेदः
स्वाहा ॥ अथवा ॥ स्वास्थ्यां सकृद्गृहीतं उपावेश्य ॥ अनेन ॥४९॥
मंत्रेण जुहूं जुहोति ॥ इदं जातवेदसे न मम ॥ इति त्यागः ॥

॥ सर्हैष यज्ञ उवाच० तर्पयति ॥१॥ यत्कर्मणा० स्वाहा ॥२॥ चतुर्भिश्च०
तस्मै यज्ञात्मने नमः ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥३॥ काले वर्षतु पर्ज
न्यः पृथिवी सस्यशालिनी ॥ देशोयं क्षोभरहितो ब्राह्मणाः संतु
निर्भयाः ॥२॥ सर्वेपि सुखिनः संतु सर्वे संतु निरामयाः ॥ सर्वे
भद्राणि पश्यंतु मा कश्चिद्दुःखमाप्नुयात् ॥३॥ अपुत्राः पुत्रिणः
संतु पुत्रिणः संतु पौत्रिणः ॥ अधनाः सधनाः संतु जीवंतु श
रदां शतं ॥ अश्वत्थोयः शमीगर्भः स्तरस्य गर्भस्य योनिरेषु ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥५०॥ रिपुगर्भस्य योगर्भस्तस्मै यज्ञात्मने नमः॥५॥ नमस्ते गार्हपत्याय नमस्ते
दक्षिणाग्नये ॥ नमऽआहवनीयाय महावेद्यै नमोनमः॥६॥
नमः सभ्यावसथ्याभ्यां भस्मोद्यापायते नमः॥ नर्यभस्मप
रंब्रह्म द्वयोर्मुक्ति प्रसाधनं ॥७॥ तयोरेकतरं सेव्यं संसार
भयनाशनं ॥ कांडद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ॥ स्व
र्गापवर्गदात्रेच यज्ञेशाय नमोनमः॥८॥ इदं विष्णुः॥१॥
त्रीणिपदा०॥२॥ तद्विप्रासो०॥३॥ तद्विष्णोः॥४॥ अनेन यथाज्ञा ॥५०॥
नेन कृतेन पौर्णमासेष्ट्याख्येन कर्मणा भगवान् स्वर्गापवर्ग

वेदोपासक-नारायण वि भानोसे
८८७, रविवार कारंजा, नासिक-१

दाता यज्ञफलभोक्ता यज्ञो वै महाविष्णुः प्रीयतान्नमम।
ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ पुनस्त्वादित्या० यजमानस्यका
मः॥१॥ यन्मेच्छिद्रं०स्मातिः॥२॥ आ वाहनं०॥ह॥३॥
यस्यस्मृत्या० विष्णवे नमः॥ विष्णवे नमः॥ विष्णवे नमः॥
अविलंबेन, चातुर्मास्ययाजी, निरूढपशुयाजी, ज्योतिष्टो
मयाजी भव ॥ यागसमृध्यर्थं स्मार्तब्राह्मणभोजनं ॥ भूयसी
प्रदानं ॥ ॐ ॥ इति शुक्लयजुःशाखीय श्रौतकर्मकांडप्रदीपे
पौर्णमासेष्टी समाप्तिमगमत् ॥ नारायण विनायक भानुवंशेनालिख

वेदोपासक-नारायण वि भ ासे
८८७, रविवार कारंजा, नासिक-१

५१॥ ॥श्री॥ अथ दर्शेष्टिः॥ दर्शेष्टि द्व्यः पक्षएव ॥ न कदापि सद्यः पक्षः॥
तत्र क्रमः॥ पक्षांतकर्मनिर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडयज्ञं त
तः कुर्यात्ततोऽन्वाहार्यकं बुधः॥१॥ इति॥ अन्वाहार्यकं दर्शश्राद्धं
॥पूर्वाह्णो देवानां मध्यंदिनो मनुष्याणामपराह्णः पितृणामिति
शतपथश्रुतेः पिंडपितृयज्ञो दौपितृकर्मणि सर्वत्र आहिताग्नी
नामनाहिताग्नीनां निरग्निकानामपि सर्वेषां व्याजसनेयिनां मेधा
विभक्तस्यान्हस्तृतीयो भागोऽपराह्णः॥ नक्तदापिपंचधाविभागः ॥५१॥
॥ संकल्पः॥ ॐ तत्सत् परमेश्वरप्रीतये दर्शेष्ट्याऽहं यक्ष्ये॥

॥अग्निमष्टाकपालेन पुरोडाशेन ॥ विष्णुर्वा मावास्यायाहैन्द्रो वा
म्नानादित्यस्मिन्पक्षे ॥ विष्णुमाज्येन ॥ इंद्राग्नी द्वादशकपाले
न पुरोडाशेन ॥ पात्रासादने २० विंशतिकपालानि ॥ हविर्ग्रहे
॥ॐ देवस्यत्वा० अग्नये जुष्टं गृह्णामि॥ ॐ देवस्यत्वा०॥ इंद्रा
ग्निभ्यां जुष्टं गृह्णामि॥ प्रोक्षणे त्वा अधिकः॥ निर्देशः॥ ॐ
इदमग्नेः॥ ॐ इदमिंद्राग्न्योः॥ प्राणदानां अग्निं गच्छ॥
इंद्राग्नी गच्छ॥ देवता कथने॥ विष्णुरुपांशु॥ अन्यदुच्चैः॥
आवाहने॥ अग्निमग्न आवह॥ सोममावह॥ अग्निमावह

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥५२॥ वह॥ विष्णुं ॥उपां॥ आवह ॥उच्चैः॥ इंद्राग्नी आवह ॥ देवां आज्यपां
आवहेत्यादि ॥उत्तमे प्रयाजे॥ ये३यजामहे स्वाहाग्निं स्वाहा
सोमं स्वाहाग्निं स्वाहा ॥उपां॥ विष्णुं॥उच्चैः॥ स्वाहेंद्राग्नी स्वा
हा देवा आज्यपा० वौषट्॥ इदमग्नये सोमायाग्नये ॥ विष्णवे
॥इंद्राग्निभ्यां देवेभ्य आज्यपेभ्य इत्यादि॥ ध्रुवान्तं ताबाजभागौ॥
अग्नयेनुब्रू३हि॥ अग्निः प्रत्नेन मन्मना शुंभानस्तन्वं स्वाम्
॥कविर्विप्रेण वावृधे ३म्॥ सोमायानुब्रू३हि॥ सोम गीर्भिष्ट्वा
वयं वर्धयामो वचोविदः॥ सुमृळीको न आविशो ३म्॥पौर्ण ॥५२॥

मासवत् याज्ये॥ प्रधानयागे॥ अग्नयेनुब्रू३हि॥ अग्निर्मूर्धा०
जिन्वतो ३म्॥ अग्निं यज॥ ये३यजामहेग्निं मुनो० हां वौषट्॥
इदमग्नयेनमः॥ विष्णवे॥ अनुब्रू३हि॥ इदं विष्णु०रे॥ ३ॐ॥
ध्रुवाया आप्यायतन्मतु गृहीतं गृहीतं॥ विष्णुं॥ यज॥ ये३यजामहे
॥विष्णुं प्रातहि० विष्वा॥ वौ३षट्॥ इदं॥ विष्णवे॥ नमम॥ इंद्राग्नी
ऽ अवसागतमिति गीर्भिर्विप्रा प्रमतिमिच्छमान इति॥ इंद्राग्निभ्या
मनुब्रू३हि॥ इंद्राग्नी ऽ अवसागतमस्मभ्यं चर्षणीसहा
॥मानो दुः शंस० राऽईशत ३म्॥ इंद्राग्नी यज॥ ये३यजामहे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥५३॥ इंद्राग्नी गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजं ॥
इंद्राग्नी वृत्रहणा सुवज्रा प्रनो नव्येभिस्तिरतं देष्णैर्वौषट्
॥ इदमिंद्राग्निभ्यां न मम ॥ त्रिष्टुभा वृत्रघ्नौ संयाजे ॥ पिप्रीहि
देवाँ उशतो यविष्ठीत अग्ने अद्य व्विशो अध्वरस्येति ॥ अग्नये
स्विष्टकृतेनुब्रूहि ॥ पिप्रीहि देवाँ२ उशतो यविष्ठ विद्वाँ२ ऋतूँ२
ऋतुपते यजेह ॥ ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्याय
जिष्ठो३ मू ॥ अग्निं स्विष्टकृतं यज ॥ ये३ यजामहे अग्निं स्विष्टकृतम ॥५३॥
याडग्निरग्नेः प्रि० सोमस्य प्रि० अग्नेः प्रि० याट् ॥ विष्णोः ॥ प्रि०

संग्राहक – नारायण वि. भानोसे
८८७, नाशिक.

॥५४॥ इंद्राग्न्योः प्रि० देवानामाज्य० जुषतां० हविरग्ने अद्य भिशो अध्व
रस्य होतः पावक शोचे वेष्ट्वं हि यज्वा ॥ ऋता यजासि महिना वि यद्भूर्
व्याव्वह यविष्ठ या ते अद्य उव्वौषट् ॥ इदमग्नये स्विष्ट० ॥ व्यूहेन
अग्नेर्विष्णोरिंद्राग्न्योरु० प्रोक्षाणि ॥ अग्निर्विष्णुरिंद्राग्नी तनपतु दत्तुष० नाप्येम
जि ॥ ऋत्रुकुलाद्धे ॥ विष्णुः ॥ इदं हविः ॥ अजुषतावीवृधत ॥ महोज्यायः ॥ अक्रत ॥
इंद्राग्नी इदं हविर्जुषेतामवीवृधेतां महो ज्यायोक्रातां ॥ देवा आज्यपा इत्यादि ॥ शेषं
पौर्णमासवत् ॥ इति दर्शेष्टिः ॥ इति दर्शपौर्णमास प्रदीपः समाप्तः ॥ श्री ॥ ॥५४॥
नारायण विनायक भानोसे नाशिक शके १८६१ पौष शु० ७ बुधवार ॐ

ANB.

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

वेदोपासक-नारायण वि भानोसे
८८७, रविवार कारंजा, नासिक-१

संग्राहक – नारायण वि. भानोसे
८८७, नासिक.

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥५॥ भ्यादाय ॥ ॐ कर्मणे वां वेषाय वां आददे ॥ वाचं यच्छत्यध्वर्युः ॥ तयोरेव प्रत
पनं प्रत्युष्टं निष्टप्तमिति वा ॥ ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः ॥ उदकोपस्पर्शः
॥ गच्छत्युर्वन्तरिक्षमिति ॥ अपणस्य पश्चात् पात्रीन्यसि ॥ ॐ उर्वन्तरिक्षम
न्वेमि ॥ धुरीषारोहणानि पात्री विलेजपति ॥ सस्वरं मंत्रजपः ॥ ॐ धूरसि धूर्व
धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः ॥ देवानामसि वन्हितमꣳ स
स्नितमं पप्रितमं जुष्टतमं देवहूतमं ॥ अह्रुतमसि हविर्धानं दृꣳहस्व माह्वार्मा
ते यज्ञपतिर्ह्वार्षीत् ॥ ॐ विष्णुस्त्वाक्रमतां ॥ प्रेक्षत उरु वातायेति वि ॥५॥
स्मात् ॥ ॐ उरु वाताय भव ॥ अपहतमिति निरस्यत्यपन्य दविद्यमाने भिन्दरो

त् ॥ ॐ अपहतꣳ रक्षः ॥ उदकोपस्पर्शः ॥ यच्छं तामित्यालभते ॥ ॐ यच्छंतां पंच
॥ देवस्य त्वेति गृह्णात्याग्नेयं चतुरो मुष्टीन् ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्वि
नोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ ॐ अग्नये जुष्टं गृह्णामि ॥ प्रथमः ॥ द्विती
यः ॥ तृतीयः ॥ तूष्णीं चतुर्थं ॥ एवमग्नीषोमीयं ॥ यथा दैवतमन्यत् ॥ भूताय
त्वेति शेषाभिमर्शनं ॥ ॐ भूताय त्वा नारातये ॥ परिशेषयामि ॥ स्वरिति प्रा
ङीक्षते ॥ ॐ स्वरभिविख्येषम् ॥ दृꣳहन्तामित्युत्थानं ॥ ॐ दृꣳहन्तां दुर्याः
पृथिव्यां ॥ गच्छत्युर्वन्तरिक्षमिति ॥ ॐ उर्वन्तरिक्षमन्वेमि ॥ अपणस्य प
श्चात्सादयति पृथिव्यास्त्वेति ॥ ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

।६।। त्वाउपस्थेऽग्नेर्हव्यꣳरक्ष ।। कुशौसमावप्रच्छीर्णाग्रावनंतरगर्भौकुशौच्छिनत्तिपवि
त्रेस्थइतित्रीन्वा ।। ॐ पवित्रेस्थोवैष्णव्यौ ।। हविर्ग्रहण्यामपः कृत्वा ।। ता
भ्यामुत्पुनातिसवितुर्वइति ।। ॐ सवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेणपवि
त्रेणसूर्यस्यरश्मिभिः ।। तास्यानंतयोः ।। सव्येकृत्वा ।। दक्षिणेनोद्दिंगय-
ति देवीरापइति ।। ॐ देवीरापोऽअग्रेगुवोऽअग्रेपुवोऽग्रऽइममद्ययज्ञंन
यताग्रेयज्ञपतिꣳसुधातुंयज्ञपतिंदेवयुवम् ।। युष्माऽइन्द्रोवृणीतवृत्रतू
र्येयूयमिन्द्रमवृणीध्वंवृत्रतूर्ये ।। प्रोक्षितास्स्थेतितासांप्रोक्षणं ।। ॐ ।।६।।
प्रोक्षितास्थ ।। हविश्चाग्नयेत्वाग्नीषोमाभ्यांत्वेति यथादेवतमन्यान् ।।

।।अस्मन् हविः प्रोक्षिष्यामि ।। उपांशु ।। ॐ प्रोक्षयज्ञं देवता० ।। धेहि ।। उच्चैः ।। ॐ
प्रोक्ष ।। ॐ अग्नयेत्वाजुष्टंप्रोक्षामि ।। ॐ अग्नीषोमाभ्यांत्वाजुष्टंप्रोक्षामि यथादेवतमन्या
।। पात्राणि दैव्यायेति ।। ॐ दैव्यायकर्मणेशुंधध्वं देवयज्यायैयद्वोशुद्धाः
पराजघ्नुरिदंवस्तच्छुंधामि ।। आदौवत्सप्रोक्षणं ।। नभेवसव्योगृहीत्वा ।। कृ
ष्णाजिनोलूखलमुसलशम्याद्दृषदुपलशूर्पाण्युपवेषकपालानि ।। आज्यस्था
ल्यादियथासादितपात्राणांप्रोक्षणं ।। असंचरेप्रोक्षणीर्निधाय ।। शर्मासी
तिकृष्णाजिनादानं ।। ॐ शर्मासि ।। अपेत्यपात्रेभ्योवधूनोत्यवधूतमिति
।। ॐ अवधूतꣳरक्षोवधूताअरातयः ।। उदकोपस्पर्शः ।। प्रत्यग्रीवमा

Takshashila Project

॥७॥ स्तृणात्यदित्यास्त्वगिति ॥ ॐ अदित्यास्त्वगसिप्रतित्वादितिर्वेत्तु ॥ सव्या
शून्येनिदधात्युलूखलमद्रिरसिग्रावासीतिवा ॥ प्रतित्वेत्युभयोः ॥ ॐ
अद्रिरसिवानस्पत्यः प्रतित्वादित्यास्त्वग्वेत्तु ॥ ग्रावासिपृथुबुध्नः प्रति
त्वादित्यास्त्वग्वेत्तु ॥ इतिवा ॥ हविरावपत्यग्नेस्तनूरिति ॥ ॐ अग्नेस्तनू
रसिवाचोविसर्जनंदेववीतयेत्वागृह्णामि ॥ वाचंविसृजतेयजमानश्च ॥
यजमानस्यसस्वरंमंत्रजपः अध्वर्योश्च ॥ ॐ इदंविष्णुर्विचक्रमेत्रे
धानिदधेपदम् ॥ समूढमस्यपांसुरे ॥ हविष्कृतावाग्नानाबीजेष्वंते ॥७॥
सामर्थ्यात् ॥ बृहद्ग्रावेतिमुसलमादत्ते ॥ ॐ बृहद्ग्रावासिवान

स्पत्यः ॥ सइदमित्यवदधाति ॥ ॐ सइदंदेवेभ्योहविः शमीष्वसुशमि
शमीष्व ॥ हविष्कृदेहीतित्रिराह्वयति ॥ ॐ हविष्कृदेहि हविष्कृदेहि ह
विष्कृदेहि ॥ अतः पत्न्यवहंत्यन्योवा दृषदुपले कुक्कु
टोसीतित्रिः शम्यया दिर्दृषदं सकृदुपलां ॥ ॐ कुक्कुटोसि मधुजिह्व
इषमूर्जमावदत्वयावयं संघातं संघातंजेष्म ॥३॥ अग्नीधस्तू
ष्णींकंडनं ॥ प्रथमः ॥ द्वितीयः ॥ तृतीयः ॥ वर्षवृद्धमसीतिशूर्पमादत्ते ॥ ॐ
वर्षवृद्धमसि ॥ प्रतित्वेतिहविरुद्वपति ॥ ॐ प्रतित्वावर्षवृद्धंवेत्तु ॥
परापूतमितिनिष्पुनाति ॥ ॐ परापूतंरक्षः परापूताअरातयः ॥३

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

॥८॥ दर्भोपस्पर्शः॥ वायुर्व इति विविनक्ति॥ ॐ वायुर्वो विविनक्तु॥ तुषसमर्पणं
॥ तूष्णीं पुनः कंडनं॥ अपहतमितितुषान्निरस्यति॥ ॐ अपहतꣳ रक्षः
॥ उद०॥ देवो व इति पात्र्यामोप्याभिमंत्रयते॥ ॐ देवो वः सविता हिरण्य
पाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना॥ त्रिः फलीकरणं॥ हविर्ग्रहणं॥
कंडनं॥३॥ शूर्पादानं॥ हविरुद्वपनं॥ निष्पवनं॥ उद०॥ विवेकीकरणं
॥ कणनिधानं॥ देवेभ्यः शुंधध्वं॥ देवेभ्यः शुंधध्वमित्येके फलीकृत्य कणा
न्निदधाति॥ पेषणोपधाने युगपत्॥ पेषणमध्वर्युः॥ उपधानमग्नी ॥८॥
त्॥ धृष्टिरसीत्युपवेषमादाय॥ ॐ धृष्टिरसि॥ अपाग्न इत्यंगारान्

माचः करोति॥ ॐ अपाग्ने अग्निमामादं जहि निष्क्रव्यादꣳ सेध॥ आ
देवयजं वहेत्यंगारमाहृत्य॥ ॐ आदेवयजं वह॥ कपालेनाबध्यादयति
ध्रुवमसीति॥ ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातव
न्युपदधामि भ्रातृव्यस्य वधाय॥ सव्यां गुल्या शून्येंगारं निदधात्य
ग्ने ब्रह्मेति॥ ॐ अग्ने ब्रह्म गृभ्णीष्व॥ धरुणमिति पश्चात्॥ ॐ धरु
णमस्यंतरिक्षं दृꣳह ब्रह्मवनि त्वा० वधाय॥ ॐ अग्ने ब्रह्म गृभ्णीष्व॥ पु
रस्तात् धर्त्रमिति॥ ॐ धर्त्रमसि दिवं दृꣳह ब्रह्मवनि त्वा० वधाय॥ ॐ अग्ने
ब्रह्म गृभ्णीष्व॥ विश्वाभ्य इति दक्षिणतः॥ ॐ विश्वाभ्यस्त्वाशाभ्य उपदधा

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.